# ।। सैषा सर्वैव वक्रोक्तिः ।।

डॉ. ललितः पटेलः
आसिस्टन्ट प्रोफेसर,
संस्कृतकोलेज,वेरावलम्

साहित्यमीमासायां महत्त्वपूर्णो वक्रोक्तिसिद्धान्तः । अलङ्कार-रीति-रस-ध्वनितत्त्ववत्प्रमुखं काव्यत्त्वं वक्रोक्तिः । वक्रोक्तिविचारमूलं तु प्राचीनं किन्तु वक्रोक्तिसिद्धान्तप्रवर्तको वर्तते कुन्तकः। तस्मात्पूर्वं वक्रभावस्तु सुपरिचित आसीदेव । व्यापकरूपेण सङ्कुचितरूपेण च वक्रव्यावहारोऽयं प्रसिद्धः स्यात् । कुन्तको व्यापकरूपेण वक्रोक्तिं स्वीकृत्य तां काव्यजीवितत्वेन काव्यप्राणत्वे च संस्थापयामास । केचन प्राचीनाचार्याः तादृशाः आसन् यत् ते रसं प्रतीयमानतत्त्वं वा स्वीकुर्वन्ति स्म व्यञ्जनाव्यापारं न । व्यञ्जनाव्यापारो हि काव्यस्य सर्वस्वमिति न ग्राह्यमिति तेषां मतम् ।[१] तत्र प्रमुखः कुन्तकाचार्यः । अत एव 'वक्रोक्तिजीवितम्' इत्यस्मिन् ग्रन्थे वक्रोक्तिविचारं भेदोपभेदसहितं सोदाहरणं सविस्तरं ध्वनितत्त्वं स्वरीत्या वक्रतायामन्तर्भावितं कृत्वा प्रस्थापयामास सः ।

## पूर्वाचार्याणां वक्रोक्तिविचारः

वक्रोक्तिविचारमूलं दृष्टिपथमवतरति भामहे । सर्वालङ्कारमूलत्वेन प्रस्थापितवान् वक्रोक्तिं भामहाचार्यः। अतिशयोक्तिरेव वक्रोक्तिरिति भामहः सैव वक्रोक्तिः सर्वालङ्कारमूला ।[२] पुनश्च काव्यलक्षणे कथयामास भामहः - 'शब्दार्थौ सहितौ काव्यमिति ।' अलङ्कारत्वेन वा सोन्दर्येन विना कथं साहित्यं वाङ्मयं वाऽलौकिकत्वमवाप्नुयात्? वक्रार्थेन वक्रशब्देन चायं वाचामलङ्कारः सिद्धिं लभते ।[३] साहित्यमात्रं काव्यमात्रं वाङ्मयमात्रं वा सम्भवति वक्रोक्त्या । वक्रमर्थात् सुन्दरम् ।[४] काव्यस्थितिं कल्पयितुं नैव शक्यते विना वक्रोक्तिम् । तां विना हेतुसूक्ष्मलेशादीनामलङ्कारत्वं न स्यात् । अत एव भामहेनोक्तं वक्रोक्तिं विना कोऽलङ्कारः ?[५] इयं वक्रोक्तिः एव अतिशयोक्तिरिति भामहः । लोकातिकान्तगोचरं वचनमतिशयोक्तिः ।[६] अतिशयोक्तिरियं गुणातिशययोगेन सम्भवति ।[७] अत्र गुणशब्दस्तु काव्यसौन्दर्यबोधकत्वेनावगम्यते । वचनस्य काव्यसौन्दर्यातिशयत्वं लोकसीमातिवर्तित्वमेव भामहस्य वक्रोक्तिः । वक्रोक्तिसद्भावे सर्वमपि ग्राह्यमिति भामहाचार्यः ।[८]

आचार्यदण्ड्यनुसारं समग्रं वाङ्मयं द्विधा-स्वभावोक्तिर्वक्रोक्तिश्चेति । तत्र सर्वासु वक्रोक्तिषु श्लेषः पुष्णाति ।[९] अत्रापि भामहवत् लोकसीमातिवर्तिनी असावतिशयोक्तिः अलङ्कारोत्तमा इति प्रोक्तम् ।[१०] सर्वेषामलङ्काराणां पराश्रयरूपाऽसावतिशयोक्तिः ।[११] स्वभावोक्ति- वक्रोक्तिप्रविभक्त-

मखिलं साहित्यमतिशयोक्तिगर्भमिति । नास्त्यत्र वक्रोक्तिरलङ्कारः किन्तु स्वभिावोक्तेः पृथक् उपमादिभ्यः सामूहिकमभिधानं स्यात् ।[१२]

वामनानुसारं सादृश्यसम्बन्धमूलं वक्रोक्तिरर्थालङ्काररूपैव । शब्दालङ्कारस्वरूपा वक्रोक्तिरिति रूद्रटः । शब्दान्तरेणाभिहितस्वरूपः आक्षिप्तोऽलङ्कारः शब्दशक्तिमूलध्वनिरिति ध्वनिकारः । शब्दाभिहितस्वरूपः आक्षिप्तस्तु न शब्दशक्तिमूलध्वनिः । तत्र वक्रोक्त्यादिवाच्यालङ्कारव्यवहार एव।[१३] अत्रापि वक्रोक्तिशब्दो वाच्यालङ्कार इति प्रयुक्तो वर्तते, व्यापकार्थः नेष्टः । क्वचिदतिशयार्थेऽपि वक्रोक्तिं स्वीकरोति ध्वनिकारः यथा - ''वाच्यालङ्कारवर्गोऽयं व्यंग्यांशानुगमे सति । प्रायेणैव परां छायां विभ्रल्लक्ष्ये निरीक्ष्यते ।।[१४]''

समाग्रालङ्कारचिन्तनसन्दर्भे अलङ्कारेषु सन्निहितं किमपि प्रतीयमानं तत्त्वं विद्यते तत्तत्त्वं भामहेन वक्रोक्तिरूपेण, दण्डिनाऽतिशयोक्तिरूपेण वामनेन सादृश्यमूलकोपमारूपेण, रूद्रटेन वाच्यालङ्कारत्वेनानन्दवर्धनेन च शब्दान्तरेण स्वीकृतम् । एवं वक्रोक्तिं व्यापकार्थे सीमितार्थे च विचारयामासुः पूर्वाचार्याः ।

**वक्रोक्तिविचारः कुन्तकस्य -**

सालङ्कारस्यालङ्कारणसहितस्य निरस्तावयवस्य कविकर्मत्वं[१५] स्वीकृत्य कुन्तकः काव्यलक्षणमाधत्ते यत् - **'शब्दार्थौ सहितौ वक्रकविव्यापारशलिनी। बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणी'।।**[१६] सालङ्कारस्य काव्यता इति कुन्तकः । पुनश्च न शब्दस्यैव रमणीयताविशिष्टस्य केवलस्य काव्यत्वम्, नाप्यर्थस्येति कुन्तकः ।[१७] द्विवचनेनात्र वाच्यवाचकजातिद्वित्वमभिधीयते । वाक्यविन्यासे - बन्धे व्यवस्थितौ शब्दार्थौ सहितौ काव्यमुच्यते । अत्र विशेषेण लावण्यादिगुणालङ्कारशोभिना सन्निवेशेन कृतावस्थानौ व्यस्थितौ इति । 'सहितौ' इत्यस्य प्रयोजनं दर्शयन् उवाच सः-**'सहितावित्यत्रापि यथायुक्तिसजातीयापेक्षया शब्दस्य शब्दान्तरेण वाच्यस्य वाच्यान्तरेण च साहित्यं परस्परस्पर्धित्वलक्षणमेव विवक्षितम् ।[१८]'** एतादृशः बन्धः वक्रकविव्यापारशालिनी स्यात् । बन्धोऽयं लोकशास्त्रादिप्रसिद्धशब्दार्थाभ्यां भिन्नषट्प्रकारवक्रताविशिष्टेन कविव्यापारेण श्लाघते ।[१९]क बन्धः ? तत्रोक्तं - वाच्यवाचकसौभाग्यलावण्य - परिपोषकः। व्यापारशाली वाक्यस्य विन्यासो बन्ध उच्यते ।।[२०] कुन्तकानुसारं काव्यरचनासमये कविप्रतिभायां केनचित्परि- स्पन्दनेन जगतः पदार्थाः प्रकृतप्रस्तावसमुचितेन केनचिदुत्कर्षेण वा समाच्छादितस्वभावाः सन्तः कविविक्षानुगुणं वाच्याः भवन्ति तथा विशेषार्थप्रतिपादनसमर्थेना - भिधानेनाभिधीयमानाः सहृदयेभ्यः चमत्कारिकतामापद्यते ।[२१] एतौ शब्दार्थावलङ्कार्यौ तथा तयोः अलङ्कृतिः वक्रोक्तिरेव । अलङ्कारस्य लक्ष्यं विद्यते लोकोत्तरचमत्कारवैचित्र्यसिद्धिः ।[२२] ध्वनिकारोऽपि समर्थनं चकार यत् -

''तत्रातिशयोक्तिर्यमलङ्कारमधितिष्ठति कविप्रतिभावशात् तस्य चारूत्वातिशयप्रयोगः अन्यस्य तु अलङ्कारमात्राता एव इति ।[२३]'' सा वक्रोक्तिः वैदग्ध्यभङ्गीभणितिरूच्यते ।[२४] वैदग्ध्यं कविकर्मकौशलं, तस्य भङ्गी विच्छित्तिः तया भणितिः विचित्रैवाभिधा वक्रोक्तिरित्युच्यते ।

कुन्तकानुसारं वक्रोक्तिः - शास्त्रदिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकिणी, प्रसिद्धप्रस्थान- व्यतिरेकिणी, अतिक्रान्तप्रसिद्धव्यावहारसरणी च । व्यक्तिविवेककारोऽपि कथयमास यत् - ''प्रसिद्धं मार्गमुत्सृज्य यत्र वैचित्र्यसिद्धये । अन्यथैवोच्यते सोऽर्थः सा वक्रोक्तिरूदाहृता ।।'' एवमलौकिकं प्रतीयमानं किमपि चमत्कारजनकमतिशयितं लोकसीमातिवर्तितत्त्वमेवातिशयोक्तिः । इदमेव सर्वालङ्कारमूलं वक्रोक्तितत्त्वं गद्यपद्याभिनयादि-काव्यप्रकारेषु सर्वत्र विलसति किञ्च स्वभावोक्ति-उपमा-रूपक-रसादिरूपेण सर्वेष्वलङ्कारेषु आविर्भवति । वक्रोक्तिस्त्वलङ्कृतिः । सैव रीतिः, ध्वनिः, चमत्कृतिः, अतिशयोक्तिः, अन्योक्तिः व्यञ्जना च । सैव वक्रोक्तिः कविचेतसः परिस्पन्दनकविकर्म इति कुन्तकः। वर्ण-पद-वाक्याद्यङ्गैः सह सम्बन्धो वर्तते तस्याः । यतो हि काव्यसिद्धान्तो वक्रोक्तिरिति ।

**वक्रतायाः प्रकाराः**

काव्यं तथा तस्यालङ्कारो वक्रता [२५], द्वयोः अपृथक्यत्ननिर्वर्त्यं भवति । कवेः रसनिष्पत्ति-प्रयत्नेन सह तयोर्निर्मितिः स्वयमेव । अतः न तेषां बहिरङ्गत्वमपृथक्प्रयत्ननिर्वर्त्यत्वात् ।[२६] अत एव वामनेनाऽपि ''सोन्दर्यमलङ्कार'' इति प्रोक्तम् । तत्सौन्दर्यमेव कुन्तकस्य वक्रोक्तिः । वक्रोक्तिरियं षट्प्रकारगुणोपेता षट्धा-१. वर्णविन्यासवक्रता २. पदपूर्वार्धवक्रता ३. पदपरार्धवक्रता (प्रत्ययाश्रयवक्रता) ४. वाक्यवक्रता ५. प्रकरणवक्रता ६. प्रबन्धवक्रता ७. तेषां प्रत्येकं प्रकाराः बहवो भेदविशेषाः ।

- वर्णानां विन्यासेनोत्पन्नं प्रसिद्धप्रस्थानव्यतिरेकिणमाह्लादकं कविकर्म वर्णविन्यासवक्रत्वमवाप्नोति।[२८] शब्दालङ्काराणां समावेशोऽत्र सम्भवति ।

- सुबन्तस्य तिङन्तस्य वा यत् प्रातिपदिकलक्षणं धातुलक्षणं वा भवति तस्य विन्यासवैचित्र्यं पदपूर्वार्धवक्रत्वं कथ्यते ।[२९] तस्यापि रूढि-पर्याय-उपचार-विशेषण-संवृत्ति-लिङ्ग-क्रियावैचित्र्येण बहवः प्रकाराः सम्भवन्ति ।

- सुप्तिङ्पदानां प्रत्ययानामाश्रयस्थानस्थवैचित्र्यं प्रत्ययाश्रयवक्रत्वमभिधीयते ।[३०] तस्यापि प्रकाराः सम्भवन्ति-सङ्ख्यावैचित्र्यविहितः, कारकवेचित्र्यविहितः, पुरूषवैचित्र्यविहितश्च ।

- आख्यातं साव्ययकारकविशेषणं वाक्यमिति । वक्रता तु श्लोकादेः भङ्गीभणितिः । एतादृशस्य

वाक्यस्य वर्णपदादिभिः पृथक् भङ्गीभणितिवैचित्र्यं वाक्यवकत्वमाधतेः । वक्रभावोऽयं सहस्त्रधा भिद्यते। यत्रार्थालङ्कावर्गः सर्वोऽप्यन्तर्भवति ।

सहजं स्वाभाविकमाहार्यं व्युत्पत्त्युपार्जितं यत्सौकुमार्यं रामणीयकं वैचित्र्यं प्रबन्धैकदेशभूते प्रकरणे वा नाटकादौ प्रबन्धे विद्यते तत्प्रकरणवैचित्र्यं प्रबन्धैकदेशभूते प्रकरणे वा नाटकादौ प्रबन्धे विद्यते तत्प्रकरणवैचित्र्यं वा प्रबन्धवैचित्र्यं कथ्यते ।[३१] प्रकरणवक्रता नवधा-१. पात्रप्रवृत्तिवक्रता २. उत्पाद्यकथावक्रता ३. उपकार्य-उपकारवक्रता ४. आवृत्तिषक्रता ५. नामकरणवक्रता ६. तुल्यकथावक्रता । प्रकारेष्वेतेषु ध्वनिकारस्य ध्वनिभेदोपभेदानामन्तर्भावः कृतः कुन्तकाचार्येण ।

**सैषा सर्वैव वक्रोक्तिः**

१. वक्रोक्तिः तथा ध्वनिः - अभिधायां व्यञ्जनाऽन्तर्भवति इत्यभिप्रैति कुन्तकः । तस्य वाचकत्वं कविविवक्षितविशेषाभिधानक्षमत्वरूपमासीत् ।[३२] वाच्यत्वे उपकारत् द्योतकव्यञ्जकावपि सम्भवतः । उपचारवक्रतायामत्यन्ततिरस्कृतवाच्यस्य लक्षणामूलध्वनेरन्तर्भाव इति कुन्तकः । एलञ्ज रूढिवैचित्र्यवक्रतायामानन्दवर्धनस्यार्थान्तरसंक्रमतिध्वनेरन्तर्भावो भवति । शब्दाशक्तिमूलानुरणनरूपव्यङ्ग्यस्य पदध्वनित्वं किन्तु एवंविधेषु बहुषु वाक्यध्वनिरिति कुन्तकः ।[३३] विचित्रमार्गे सः वाक्यार्थस्य प्रतीयमानस्योल्लेखं विदधाति ।[३४] तस्य मतानुसारं वस्तुवक्रतैवानन्दवर्धनस्य वस्तुध्वनिः ।[३५] भोजवदेवस्तु वक्रतायाः प्रयोगं ध्वनिसन्दर्भे चकार । तात्पर्यप्रकारः ध्वनिः, यस्य काव्येषु ध्वनिरिति प्रसिद्धिः ।[३६] आनन्दवर्धनस्य ध्वनिः महाकाव्यकौशलम् । कुन्तकस्य वक्रोक्तिः कविकर्मकौशलम् । कुन्तकस्य विचित्रमार्ग एव ध्वनिमार्गः । आनन्दवर्धनस्य ध्वनिप्रकाराः कुन्तकस्य वक्रोक्तिप्रकारष्वन्तर्भन्ति ।

**२. वक्रोक्तिः तथा रसः** - कुन्तकस्य वक्रोक्तिः काव्यस्य जीवितम् । रसस्य विचारः सः रसवदादि-अलङ्कारसन्दर्भे चकार । रसस्तु अलङ्कार्यवस्तु नालङ्कार इति तस्य मतम् । तद्विदाह्लादरस इति कुन्तकः । सः कथयामास यत् कथामात्रमाश्रिताः कवीनां गिरः न जयन्ति, तत्र प्रयोजनं तु रसनिबन्धनमेव ।[३७] वस्तुवक्रतायाः सन्दर्भे कुन्तकः उवाच - यत् चेतनानां जडानं पदार्थानां स्वरूपं रसोद्दीपनसामर्थ्यविनिबन्धुनबन्धुरं स्यात् ।[३८] कुन्तकानुसारं भावकः रसदिपरमार्थज्ञः । वक्रतायाः भेदोपभेदेषु रससिद्धिः स्यादित्याशयः ।

**३. वक्रोक्तिः तथा अलङ्कारः** - वस्तुतः अलङ्कारसिद्धिन्ते वक्रोक्तिरलङ्कारस्तु अतिशयोक्ति-

वर्गस्य । कुन्तकानुसारं वक्रोक्तिः सर्वालङ्कारमूला, अलङ्कारास्तु काव्यशोभायाः कर्तारो धर्माः । शब्दालङ्काराः वृणवक्रता - यामर्थालङ्काराः वाक्यवक्रतायामन्तर्भवन्ति इति कुन्तकः । भोजानुसांर वाङ्मयं त्रिविधं - वक्रोक्तिः रसोक्तिः स्वभावोक्तिश्चेतिः ।[३९] तत्रोपमानादिप्राधान्ये वक्रोक्तिः । साऽपि गुणप्राधान्ये स्वभावोक्ति । विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पतौ रसक्तिरिति ।[४०] कुन्तकस्य वक्रोक्तिस्तु काव्यप्राणः काव्यात्मा च । उपमानुप्रासाद्यालङ्काराणां न बहिरङ्गत्वमित्याशयः । कवि-कर्मणि सालङ्कारकाव्यत्वमिति । वक्रोक्ति (अतिशयोक्तिः) सर्वालङ्कारमूला इति विशेषऽलङ्कारेऽघोषयत्मम्मटाचार्यः । यथा - ''सर्वत्र एवंनिधविषयेऽतिशयोक्तिरेव प्रमाणत्वेनावतिष्ठते तां विना प्रायेणालङ्कारत्वायोगात् ।'' (मम्मटः काव्यप्रकाशः १०/वृत्ति, पृ.-४८९)

४. **वक्रोक्तिः तथा रीतिः** - कुन्तकः स्वभावभेदे मार्गभेदसिद्धान्तमाधत्ते । विदर्भादि-देशस्याश्रयेण वैदर्भीप्रभृतयः तिस्रः रीतयः वामनादिभिः समाम्नाताः । अन्यैश्च वैदर्भगौडीयलक्षणं मार्गद्वितीयमाख्यातम्, एतत् न युक्तियुक्तमिति कुन्तकः । यतो हि देशभेदेन तु रीतिभेदानामसङ्ख्यतत्वं प्रसज्यते देशनामानन्त्यात् ।[४१] अतः कविस्वभावभेदात्काव्यमार्गभेदो मन्तव्यो वर्तते । काव्ये त्रयो मार्गाः सम्भवन्ति, ते कविप्रस्थानहेतवः सुकुमारो विचित्रश्च मध्यमश्चेति ।[४२] तत्र सुकुमारमार्गस्य चत्वारः गुणाः - माधुर्यम्, प्रसादः, लावण्यम्, अभिजात्यश्च । मध्यमोऽपि माधुर्यादि चतुर्गुणग्रामो मार्गः ।

एवं भामहस्य वक्रभावविचारबीजं ध्वनि-रस-रीति-अलङ्कारादिसर्ववक्रप्रकारविशेषान् वृक्षशाखारूपेण परिकल्प्य धवनिविचारपीठेऽवस्थाप्य वक्रोक्तिवटवृक्षं संवर्धितवान् कुन्तकाचार्यः । अत एव प्रोच्यते सैषा सर्वैव वक्रक्तिः ।

## सन्दर्भग्रन्थाः

१. डॉ. तपस्वी नान्दी, भारतीयसाहित्यशास्त्रस्य विचारपरम्पराः, पृ.४०४

२. भामहः, काव्यालङ्काः, २.८४

सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ।।

३. तत्रैव, १.३६

न नितान्तादिमात्रेण जायते चारूता गिराम् ।
वक्राऽभिधेयशब्दोक्तिरिष्टा वाचामलङ्कृतिः ।।

४. तत्रैव, १.६६

५. तत्रैव, २.८५

६. तत्रैव, २.८१

७. तत्रैव, २.८४

८. तत्रैव, १.३०

९. दण्डी, काव्यादर्शः २.२६३

श्लेषः सर्वासु पुष्णाति प्रायः वक्रोक्तिषु श्रियम् ।

भिन्नं द्विधा स्वभावोक्तिश्चेति वाङ्मयम् ।।

१०. तत्रैव, २.२१४

विवक्षा या विशेषस्य लोकसीमातिवर्तिनी ।

असावतिशयोक्तिः स्यादलङ्कारोत्तमा यथा ।।

११. तत्रैव, २.२२०

१२. हृदयंगमा टीका

स्वभावोक्तिराद्यालङ्कारः । वक्रोक्तिशब्देन उपमादयः संकीर्णपर्यन्ता अलङ्कारा उच्यन्ते ।

१३. आनन्दवर्धनः ध्वन्यालोकः, २.२१ वृत्तिः

स चाक्षिप्ताऽलङ्कारः यत्र पुनः शब्दान्तरेणाभिहितस्वरूपस्तत्र न शब्दशक्त्युद्भवानुरण-नरूपध्वनिव्यवहारः। तत्र वक्रोक्तयादिवाच्यालङ्कारव्यवहार एव ।

१४. तत्रैव, ३.३६ वृत्तिः ।

१५. कुन्तकः, वक्रोक्तिजीवितम्,१.६ वृत्तिः

सालङ्कारस्य अलङ्करणसहितस्य निरस्तावयवस्य सतः काव्यता, कविकर्मत्वम् ।

तेनालङ्कृतस्य काव्यत्वमिति स्थितिः, न पुनः काव्यस्य अलङ्कारयोगः इति ।।

१६. तत्रैव, १.७

१७. तत्रैव, १.७, वृत्तिः

१८. तत्रैव, १.७, वृत्तिः

१९. तत्रैव, १.७, वृत्तिः

वक्रो योऽसौ शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकी षट्प्रकारवक्रताविशिष्टः कविव्यापारस्तत्क्रियाक्रमस्तेन श्लाधते यस्तस्मिन् । एवमपि कष्टकल्पनो-पहतेऽपि प्रसिद्धव्यतिरोकित्वमस्तीत्याहतद्विदाह्लादकारिणि ।

२०. तत्रैव, १/२२

वाच्यवाचकसौभाग्यलावण्यपरिपोषकः ।

व्यपारशाली वाच्यस्य विन्योसो बन्ध उच्यते ।।

२१. तत्रैव, १/९ वृत्तिः

२२. तत्रैव, १/२

२३. आनन्दवर्धनः, ध्वन्यालोकः, ३.३६

२४. कुन्तकः, वक्रोक्तिजीवितम्, १.१०

उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः ।

वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिशरूच्यते ।।

२५. तत्रैव, १.१०

२६. आनन्दवर्धनः ध्वन्यालोकः, २.१६

रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् ।

अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः ।।

२७. कुन्तकः, वक्रोक्तिजीवितम्,१.१९-२०-२१

कविव्यापारवक्रत्वप्रकाराः सम्भवन्ति षट् ।

प्रत्येकं बहवो भेदास्तेषां विच्छित्तिशोभिनः ।।

वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता ।

वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः ।।

वाक्यस्य वक्र भावोऽन्यो भिद्यते यः सहस्त्रधा ।

यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति ।।

वक्रभावः प्रकरणे प्रबन्धेऽप्यस्ति यादृशः ।

उच्यते सहजाहार्यसौकमार्यमनोहरः ।।

२८. तत्रैव, १.१९ वृत्तिः -

वर्णानां विन्यासो वर्णविन्यासः अक्षराणां विशिष्टन्यसनं तस्य वक्रत्वं वक्रभावः प्रसिद्धस्थानव्यतिरेकिणा वैचित्र्येणोपनिबन्धः सन्निवेशविशेषविहितस्तद्विदाह्लादकारी शब्दशोभातिशयः ।

२९. तत्रैव, १.१९ वृत्तिः -

पदस्य सुबन्तस्य तिङन्तस्य वा यत्पूर्वार्धं प्रातिपदिकलक्षणं धातुलक्षणं वा तस्य वक्रता वक्रभावो विन्यासवैचित्र्यम् ।

३०. तत्रैव, १.१९ वृत्तिः -

वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः इति । वक्रभावस्यान्योऽपि प्रभेदो विद्यते । कीदृशः -प्रत्ययाश्रयः । प्रत्ययः सुप्तिङ् च यस्याश्रयः स्थानं स तथोक्तः ।

३१. तत्रैव, १.२१

वक्रभावः प्रकरणे प्रबन्धेऽप्यस्ति यादृशः ।

उच्यते सहजाहार्यसौकुमार्यमनोहरः ।।

३२. तत्रैव, १.८

वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि ।

तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः ।।

३३. तत्रैव, २.११ वृत्तिः-

एष एव च शब्दशक्तिमूलानुरणरूपव्यङ्ग्यस्य पदध्वनेर्विषयः । बहुषु चैवंविधेषु सत्सु वाक्यध्वनैर्वा।

३४. तत्रैव, १.४०

प्रातीयमानता यत्र वाक्यार्थस्य निबध्यते ।

वाच्यवाचकवृत्तिभ्यां-व्यतिरिक्तस्य कस्यचित् ।।

३५. तत्रैव, वृत्तिः

वाच्यत्वैनेति नोक्तम्, व्यङ्ग्यत्वेनापि प्रतिपादनसम्भवात् ।

३६. शृङ्गारप्रकाशः, प्रकरणम् -६,पृ.४२

तात्पर्यं, यस्य काव्येषु ध्वनिरिरिति प्रसिद्धिः । तदुक्तम् तात्पर्यमेव वचसि ध्वनिरेव काव्ये...

कः पुनः अनयोः काव्यवचसोः ध्वनितात्पर्ययोः विशेषः ?

३७. कुन्तकः, वक्रोक्तिजीवितम्, ४.३-४ तत्रापि अवान्तरश्लोकः

निरन्तररसोद्‌गारगर्भसन्दर्भनिर्भरः ।

गिरः कवीनां जयन्ति न कथामात्रमाश्रिताः ।।

३८. कुन्तकः, वक्रोक्तिजीवितम्,३.८

रसादीपनसामर्थ्यविनिबन्धनबन्धुरम् ।

चेतनानाममुख्यानां जडानां चापि भूयसा ।।

३९. भोजदेवः, सरस्वतीकण्ठाभरणम्, ५.८

वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्चेति वाङ्मयम् ।

सर्वासु ग्राहिर्णी तासु रसोक्तिं प्रतिजानते ।।

४० भोजदेवः, शृङ्गरप्रकाशः

४१. कुन्तकः वक्रोक्तिजीवितम्, १.२४ वृत्तिः

४२. तत्रैव, १.२४

सन्ति तत्र त्रयो मार्गाः कविप्रस्थानहेतवः ।

सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः ।।

---